# 2022

## 5th Semester Examination

## SANSKRIT (Honours)

### Paper : DSE 1-T

[CBCS]

Full Marks : 60 Time : 3 Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

### [Indian System of Logic and Debate]

1. अधोलिखितेषु सुरगिरा देवनागर्या च दश प्रश्नाः समाधेया : 2×10=20

(क) साधर्म्य-वैधर्म्याभ्यां प्रत्यवस्थानं का ? गौतममते तस्याः कति विभागाः सन्ति ?

(ख) सिद्धान्तः कति-विधाः ? के च ते ?

(ग) न्यायः कः ? स कुत्र प्रवर्तते ?

(घ) 'अयं कपिसंयोगी एतद्वृक्षत्वान्'—इत्यनुमाने कः साध्यः, को हेतुः कश्च पक्षः ?

(ङ) अक्षपादेन विरचितः ग्रन्थः कः ? तत्र कति अध्यायाः सन्ति ?

(च) तर्कसंग्रहग्रन्थे कति प्रमाणानि स्वीकृतानि ? तेषां नामानि लिखितव्यानि।

P.T.O.

(छ) कः विपक्षः ? एकमुदाहरणं देहि।

(ज) वादस्य लक्षणं किम् ?

(झ) पक्षधर्मता इत्यस्य कोऽर्थः ?

(ञ) लिङ्गस्य तृतीयदर्शनं नाम किम् ? तदनन्तरं किं भवति ?

(ट) साध्यनिर्देशः का ?

(ठ) का नाम वितण्डा ?

(ड) का खलु अनुलोमसम्भाषा ?

(ढ) वाक्छलस्योदाहरणं दीयताम्।

(ण) प्रतिज्ञाहानिः कस्य पदार्थस्य विभागविशेषः ? तस्य लक्षणं किम् ?

2. यथारुचि **प्रश्नचतुष्टयं** समाधेयम् (एकस्योत्तरं अवश्यमेव सुरगिरा देवनागर्या च प्रदेयम्) : 5×4=20

(क) संक्षेपेण निर्णयस्य स्वरूपं प्रतिपादनीयम्।

(ख) यथेच्छमेकमाश्रित्य टीका लेखनीया : परिषद्, निग्रहस्थानम्।

(ग) तर्कसंग्रहानुसारतः उपाधिस्वरूपं संक्षेपेण आलोच्यताम्।

(घ) का व्याप्तिः ? तस्याः स्वरूपं तर्कसंग्रहदिशा विचार्यताम्।

(ङ) न्यायसम्मतं दृष्टान्तलक्षणं किम् ? प्रतिपक्षस्य प्रतिषेधः कथं भवति ?

(च) किं छललक्षणम् ? तत् कतिविधम् ? तेषु उपचार-च्छललक्षणं व्याख्यायताम्।

(छ) सम्भाषाविधेः स्वरूपं गौतममते संक्षेपेण वर्णनीयम्।



3. यथेच्छं **प्रश्नद्वयं** समाधेयम् : 10×2=20

(क) आन्वीक्षिकीशब्दस्य व्युत्पत्तिः निर्णेया। कथं न्यायशास्त्रस्य नामान्तरं आन्वीक्षिकी न्यायदर्शनदृष्ट्या प्रतिपाद्यताम् ?

(ख) परार्थानुमाने पञ्चावयवानां प्रयोजनमुल्लिख्य सोदाहरणं तेषां स्वरूपं प्रतिपादनीयम्।

(ग) को नाम परामर्शः ? परामर्शविषये एकः प्रबन्धो विरच्यताम्।

(घ) लिङ्गं कतिविधम् ? प्रत्येकं प्रकारः सोदाहरणमालोच्यताम्।

---

P.T.O

***OR***

**[Art of Balanced Living]**

1. अधस्तनेषु प्रश्नेषु यथेच्छं **दश** समाधेया : 2×10=20

(क) 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' —इति केन कस्यै उपदिष्टम् ?

(ख) 'आत्मा वा अरे'—इत्यादि श्रुतौ 'निदिध्यासितव्य' इति पदस्य किं तात्पर्यम् ?

(ग) मननं नाम किम् ?

(घ) 'चित्तवृत्तिनिरोधः' इत्यत्र क समासः ?

(ङ) 'तत्र स्थितौ यत्नोऽभ्यासः' इत्यत्र तत्र-पदेन किं परामृष्टम् ?

(च) अभ्यासस्य दृढभूमित्वं कथं सम्भवति ?

(छ) योगस्याष्टाङ्गेषु अपरिग्रहः कतमम् अङ्गम् ? अपरिग्रहस्यार्थः कः ?

(ज) के नियमाः ? ईश्वरप्रणिधानं नाम किम् ?

(झ) किं तावद् ध्यानमुच्यते ? सूत्रस्थित—'तत्र'—पदेन किं विवक्षितम् ?

(ञ) को बुद्धिमान् युक्तः कृत्स्नकर्मवित् ?

(ट) संशयात्मनः का भवति दशा ?

(ठ) अनिच्छन्नपि पुमान् केन नियोजितः पापं चरति ?

(ड) चञ्चलं मनः कथं निग्रहीतुं शक्यम् ?



(ढ) अज्ञानसम्भूतः संशयः केन छेद्यः ?

(ण) गुणकर्मविभागशः केन किं सृष्टम् ?

2. अधस्तनेषु प्रश्नेषु यथेच्छं **चत्वारः** समाधेया : 5×4=20

(क) भगवतः प्रियभक्ताः के ? कथं ? च इति वैशद्येन व्याख्येयम्।

(ख) ईश्वरे चित्तनिवेशे अशक्ताय उपदिष्टाः चित्तसमाधानोपायाः के ?

(ग) योगभ्रष्टस्य का गतिर्भवति ?

(घ) चित्तप्रसादनं कथं भवति ?

(ङ) कस्तावत् क्रियायोगः ?

(च) का तावत् पुरुषख्यातिः ? किं तस्याः फलम् ?

3. अधः प्रदत्त-प्रश्नानां **द्वौ** समाधेयौ : 10×2=20

(क) युक्तो योगी क उच्यते ? योग-सम्पादन-नियमाः के ? विगतकल्मषो योगी किं फलमश्नुते ?

(ख) कर्मण आवश्यकत्वं श्रेष्ठत्वं च कथम् ? आत्मज्ञानिनः कथं कर्मराहित्यं भवति ? अनासक्तेन तत्त्वज्ञेन कर्म करणीयं कथम् ?

(ग) बृहदारण्यकोपनिषदि उपदिष्ट आत्मसाक्षात्कारोपायो वैशद्येन व्याख्येयः।

(घ) योगः कः कथं च साध्यते इति सूत्रानुसारं सरलगिरा प्रतिपादनीयम्।

---